# Shri Vrindavanashtakam

# શ્રીવૃન્દાવનાષ્ટકમ્

## Document Information

Text title : vRRindAvanAShTakam 1

File name : vRRindAvanAShTakam.itx

Category : vishhnu, krishna, rUpagosvAmin, stavamAlA, aShTaka

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 25, 2021

*sanskritdocuments.org*

# શ્રીવૃન્દાવનાષ્ટકમ્

મુકુન્દમુરલીરવશ્રવણફુલ્લહૃદ્વલ્લરી
    કદમ્બકકરમ્બિતપ્રતિકદમ્બકુઞ્જાન્તરા ।
કલિન્દગિરિનન્દિનીકમલકન્દલાન્દોલિના
    સુગન્ધિરનિલેન મે શરણમસ્તુ વૃન્દાટવી ॥ ૧॥

વિકુણ્ઠપુરસંશ્રયાદ્ વિપિનતોઽપિ નિઃશ્રેયસાત્
    સહસ્રગુણિતાં શ્રિયં પ્રદુહતી રસશ્રેયસીમ્ ।
ચતુર્મુખમુખૈરપિ સ્પૃહિતતાર્ણદેહોદ્ભવા
    જગદ્ગુરુભિરગ્રિમૈઃ શરણમસ્તુ વૃન્દાટવી ॥ ૨॥

અનારતવિકસ્વરવ્રતતિપુઞ્જપુષ્પાવલી
    વિસારિવરસૌરભોદ્ગમરમાચમત્કારિણી ।
અમન્દમકરન્દભૃદ્વિટપિવૃન્દવૃન્દીકૃત
    દ્વિરેફકુલવન્દિતા શરણમસ્તુ વૃન્દાટવી ॥ ૩॥

ક્ષણદ્યુતિઘનશ્રિયોવ્રજનવીનયૂનોઃ પદૈઃ
    સુવગ્લુભિરલઙ્કૃતા લલિતલક્ષ્મલક્ષ્મીભરૈઃ ।
તયોર્નખરમણ્ડલીશિખરકેલિચર્યોચિતૈ-
    ર્વૃતા કિશલયાઙ્કુરૈઃ શરણમસ્તુ વૃન્દાટવી ॥ ૪॥

વ્રજેન્દ્રસખનન્દિનીશુભતરાધિકારક્રિયા
    પ્રભાવજસુખોત્સવસ્ફુરિતજઙ્ગમસ્થાવરા ।
પ્રલમ્બદમનાનુજધ્વનિતવંશિકાકાકલી
    રસજ્ઞમૃગમણ્ડલા શરણમસ્તુ વૃન્દાટવી ॥ ૫॥

અમન્દમુદિરાર્બુદાભ્યધિકમાધુરીમેદુર
    વ્રજેન્દ્રસુતવીક્ષણોન્નટ્ણતનીલકણ્ઠોત્કરા ।
દિનેશસુહૃદાત્મજાકૃતનિજાભિમાનોલ્લસલ્-
    લતાખગમૃગાઙ્ગના શરણમસ્તુ વૃન્દાટવી ॥ ૬॥

અગણ્યગુણનાગરીગણગરિષ્ઠગાન્ધર્વિકા
 મનોજરણચાતુરીપિશુનકુઞ્જપુઞ્જોજ્જ્વલા ।
જગત્ત્રયકલાગુરોર્લલિતલાસ્યવલ્ગત્પદ
 પ્રયોગવિધિસાક્ષિણી શરણમસ્તુ વૃન્દાટવી ॥ ૭॥

વરિષ્ઠહરિદાસતાપદસમૃદ્ધગોવર્ધના
 મધૂદ્વહવધૂચમત્કૃતિનિવાસરાસસ્થલા ।
અગૂઢગહનશ્રિયો મધુરિમવ્રજેનોજ્જ્વલા
 વ્રજસ્ય સહજેન મે શરણમસ્તુ વૃન્દાટવી ॥ ૮॥

ઇદં નિખિલનિષ્કુટાવલિવરિષ્ઠવૃન્દાટવી
 ગુણસ્મરણકારિ યઃ પઠતિ સુષ્ઠુ પદ્યાષ્ટકમ્ ।
વસન્ વ્યસનમુક્તધીરનિશમત્ર સદ્વાસનઃ
 સ પીતવસને વશી રતિમવાપ્ય વિક્રીડતિ ॥ ૯॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં શ્રીવૃન્દાવનાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Vrindavanashtakam*
pdf was typeset on November 25, 2021

Please send corrections to *sanskrit@cheerful.com*